कुब्जं वृचादनीयुक्तं लताच्छन्नं तरुं त्यजेत् ॥
पचिवाससमाकीर्णं कोटरैर्बहुभिर्युतम् ।
पवनानलविध्वस्तं तरुं यत्नेन वर्जयेत् ॥
नारीसंज्ञाश्च ये वृचा अतिकृस्वा अतिकृशाः ।
तान् सदा वर्जयेद्धीरः सर्व्वदा शक्रपूजने ॥
अर्ज्जुनोऽप्यश्वकर्णश्च प्रियको धव एव च ।
औडुम्बरश्च पञ्चैते केत्वर्थे सत्तमाः स्मृताः ॥
अन्ये च देवदार्वाद्याः शालाद्यास्तरवस्तथा ।
प्रशस्तास्तु परिग्राह्या नाप्रशस्ताः कदाचन ॥
तञ्च वृक्षं ततो रात्रौ स्पृष्ट्वा मन्त्रमिमं पठत् ॥
यानि वृचे तु भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः।
उपहारं गृहीत्वेमं क्रियतां वासवध्वजः ॥
पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम ।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥
ततोऽपरेऽह्नि तं छित्त्वा मूलमष्टाङ्गुलं पुनः ।
जले चिपेत्तदग्रस्य छित्त्वैवं चतुरङ्गुलम् ॥
ततो नीत्वा पुरद्वारं केतुं निर्म्माय तत्र वै ।
शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् ॥
द्वाविंशद्धस्तमानस्तु अधमः केतुरुच्यते ।
द्वात्रिंशत्तु ततो ज्यायान् द्वाचत्वारिंशदेव च ॥
ततोऽधिकः समाख्यातो द्वापञ्चाशत्तथोत्तमः ।
कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ! ॥
शालमय्यस्तु ताः सर्व्वास्त्वपराः शक्रमातृकाः ।
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ॥
मातृकार्द्धप्रमाणात्तु यन्त्रं हस्तद्वयं तथा ।
एवं कृत्वा कुमारीश्च मातृकां केतुमेव च ॥
एकादश्यां सिते पचे यष्टिं तामधिवासयेत् ।
अधिवास्य ततो यष्टिं गन्धद्वारादिमन्त्रकैः ॥
द्वादश्यां मण्डलं कृत्वा वासवं विस्तृतात्मकम् ।
अच्युतं पूजयित्वा तु शक्रं पश्चात् प्रपूजयेत् ॥
शक्रस्य प्रतिमां कुर्य्यात् कानकीं दारवीं तथा ।
अन्यतैजसभूतां वा सर्व्वाभावे तु मृण्मयीम् ॥
तां मण्डलस्य मध्ये तु पूजयित्वा विशेषतः ।
ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः ॥
वज्रहस्त सुरारिघ्न बहुनेत्र पुरन्दर ।
चेमार्थं सर्व्वलोकानां पूजेयं प्रतिगृह्यताम् ॥
एह्येहि सर्व्वामरसिद्धसंघै-
रभिष्टुतो वज्रधरामरेश ! ।
समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन् नमस्ते ॥
एवमुत्तरतन्त्रोक्तैर्दहनप्लवनादिभिः ।
इति मन्त्रेण तन्त्रेण नानानैवेद्यवेदनैः ॥
आपूपैः पायसैः पानैर्गुडैर्धानाभिरेव च ।
भक्ष्यैर्भोज्यैश्च विविधैः पूजयेत् श्रीविवृद्धये ॥
घटेषु दशदिक्पालान् ग्रहांश्च परिपूजयेत् ।
साध्यादीन् सकलान्देवान् मातॄः सर्व्वास्त्वनु-
क्रमात् ॥
ततः शुभे मुहूर्त्ते तु ज्ञानिवर्द्धकिसंयुतः ।
केतोरुत्थानभूमिन्तु यज्ञवेद्याश्च पश्चिमे ।
विप्रैः पुरोहितैः सार्द्धं यन्त्रश्लिष्टं समातृकम् ।
रज्जुभिः पञ्चभिर्बद्धं यन्त्रश्लिष्टं समातृकम् ।
कुमारीभिश्च संयुक्तं दिक्पालानाञ्च पेटकैः ॥"
पेटकैः स्थाने पट्टकैरिति च पाठः ।
"वृहद्भिरतिकान्तैश्च नानाद्रव्यसुपूरितैः ।
यथावर्णैर्यथादेशयोजितैर्वस्त्रवेष्टितैः ॥
युक्तं तं किङ्किणीजालैर्बृहद्घण्टौघचामरैः ।
भूषितं बहुरत्नैश्च माल्यैर्बहुविधैस्तथा ॥
बहुपुष्पैः सुगन्धैश्च भूषितं रत्नमालया ।
चित्रमाल्याम्बरधरैश्चतुर्भिरपि तोरणैः ॥
उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः ।
तमुत्थाप्य महाकेतुं पूजितं मण्डलान्तरे ॥
प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयन् ।
यजेत्तं पूर्ववत्तत्र शचीं मातलिमेव च ॥
जयन्तं तनयं तस्य वज्रमैरावतं तथा ।
ग्रहांश्चाप्यथ दिक्पालान् सर्वांश्च गणदेवताः ।
अपूपाद्यैः पूजयेत्तु बलिभिः पायसादिभिः ।
पूजितानाञ्च देवानां शस्त्रहोमं समाचरेत् ॥
होमान्ते तु बलिं दद्यात् वासवाय महात्मने॥
तिलं घृतं चाचतञ्च पुष्पं दूर्वां तथैव च ।
एतैस्तु जुहुयाद्देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः ॥
ततो होमावसाने तु भोजयेदपि ब्राह्मणान् ।
एवं संपूजयेन्नित्यं सप्तरात्रं दिने दिने ॥
ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः ।
सर्वत्र शक्रपूजासु यज्ञेषु परिकीर्त्तितः ॥
त्रातारमिति मन्त्रोऽयं वासवस्य प्रियः सदा ।
एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ॥
श्रवणर्चयुतायान्तु द्वादश्यां प्रार्थिवः स्वयम् ।
अन्त्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत् ॥
सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति ।
षण्मासान्मृत्युमाप्नोति राजा दृष्ट्वा विसर्जनम् ॥
शक्रस्य नृपशार्दूल तस्मान्नेचेत तं नृपः ।
विसर्ज्जनस्य मन्त्रोऽयं पुराविद्भिरुदीरितः ॥
सार्द्धं सुरासुरगणैः पुरन्दर शतक्रतो ।
उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम् ॥
सूतके तु समुत्पन्ने वारे भौमस्य वा शनेः ।
भूमिकम्पादिकोत्पाते वासवं न विसर्जयेत् ॥
उत्पाते सप्तरात्रन्तु तथोपप्लवदर्शने ।
व्यतीत्य शनिभौमौ च ह्यन्यर्च्चेऽपि विसर्जयेत् ॥
मृतके त्वथ संप्राप्ते व्यतीते सूतके पुनः ।
तस्मिंस्तस्मिन् दिने चैव सूतकान्ते विसर्जयेत्॥
तथा रक्षेन्नृपः केतुं पतन्ति शकुना यथा ।
न केतौ नृपशार्दूल यावन्नापि विसर्जनम् ॥
शनैः शनैः पातयेत्तु यथोत्थापनमादितः ।
कृतं तथान्यथा भग्ने केतौ मृत्युमवाप्नुयात् ॥
विसृष्टं शक्रकेतुं तं सालङ्कारं तथा निशि ।
चिपेदनेन मन्त्रेण त्वगाधे सलिले नृपः ॥
तिष्ठ केतो महाभाग यावत् संवत्सरं जले ।
भवाय सर्वलोकानामन्तरायविनाशक ! ॥
उत्थापयेत्तूर्य्यरवैः सर्वलोकस्य वै पुरः ।
रहो विसर्जयेत् केतुं विशेषोऽय प्रपूजने ॥
एवं यः कुरुते पूजां वासवस्य महात्मनः ।
स चिरं पृथिवीं भुक्त्वा वासवं लोकमाप्नुयात् ॥
न तस्य राज्ये दुर्भिचं नेतयो नाप्यधर्म्मकृत् ।
स्यास्यन्ति मृत्युर्नाकाले जनानां तत्र जायते ॥
तत्तुल्यः कोऽपि नान्योऽस्ति प्रियः शक्रस्य
पार्थिव ! ।
तस्य पूजा सर्वपूजा केशवाद्याश्च तत्रगाः ॥
सकलकलुषहारि व्याधिदुर्भिचनाशि
सकलभवनिवेशं सर्वसौभाग्यकारि ।
सुरपतिगृहगामीहार्च्चनं शक्रकेतोः
प्रतिशरदमनेकैः पूजयेत् श्रीविवृद्धै ॥"
इति श्रीकालिकापुराणे ८८ अध्यायः ॥

शक्रोत्सवः, पुं, (शक्रस्योत्सवः ।) इन्द्रस्य उत्सवः । तत्पर्य्यायः । ध्वजोत्थानम् २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ६३ । २७ ।
"वरदानमहायज्ञैस्तथा शक्रोत्सवेन च ।
संपूजिता मघवता वसुश्चेदीश्वरो नृपः ॥")
अस्य विवरणं शक्रोत्थानशब्दे द्रष्टव्यम् ॥

शक्तः, पुं, (शक + "भूङ्शक्याविभ्यः क्तः ।" उणा० ४ । १०८ । इति क्तः ।) प्रियंवदः । इति शक्तशब्दटीकायां भरतः ॥

शक्तरः, पुं, हषः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शक्करी, स्त्री, (शक्नोति कर्म्माणि कर्त्तुमिति । शक + "स्नामदिपदीति ।" उणा० ४ । ११२ । इति वणिप् । "वनो रच ।" ४ । १ । ७ । इति ङीब्रौ ।) अङ्गुली । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ नदीविशेषः । मेखला । छन्दोभेदः । इति मेदिनी ॥ स तु चतुर्द्दशाचरपादवृत्तम् । तद्भेदा यथा । असंबाधा १ वसन्ततिलकम् २ सिंहोद्धता ३ अपराजिता ४ प्रहरणकलिका ५ वासन्ती ६ लोला ७ नान्दीमुखी ८ । इति छन्दोमञ्जरी ॥ (ऋक् । यथा, ऋग्वेदे । १० । ७१ । ११ ।
"ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्करीषु ॥"* ॥
शक्नोति चीरादिप्रदानेन तद्वन्तं प्रीणयितुं स्पर्शनेन वा पापमपनेतुमिति । शक + वनिप् । ङीब्रौ च । गौः । इति निघण्टुः । २ । ११ ॥)

शक्का,[न्] पुं, (शक्नोतीति । शक् + "स्नामदिपदीति ।" उणा० ४ । ११२ । इति वनिप् ।) हस्ती । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शङ्कः, पुं, शकटादिवाहकवृषभः । यथा,—
"स्कन्धवाहस्तु शङ्कश्च शृङ्गी गौरचधूर्त्तिलः ।"
इति हारावली ॥

शङ्करः, पुं, (शं कल्याणं करोतीति । शम् + कृ + "शमिधातोः संज्ञायाम् ।" ३ । २ । १४ । इति अच् ।) शिवः । इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा,—
"सदा ध्यानाच्च भक्तानां पवनं यन्निरामयम् ।
भूतनाथत्वमप्यस्मात्तेनाहं शङ्करः स्मृतः ॥"
इति स्कन्दपुराणम् ॥
अस्य भस्मास्थिधारणकारणं यथा,—
"विसृज्य तान् ब्रह्मविष्णुमयान् वृषभवाहनः ।
आदाय सगणान् सर्वान् कामरूपान्तरं ययौ ॥
उग्रतारां ततो देवीं गणांश्च प्राह शङ्करः ।